# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (द्वितीय अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ द्वितीयोऽध्यायः ॥

विनियोगः

अस्य श्री मध्यमचरित्रस्य विष्णुर्ऋषिः,

श्रीमहालक्ष्मीर्देवता,

उष्णिक् छन्दः । शाकम्भरी शक्तिः । दुर्गा बीजम् ।

वायुस्तत्त्वम् ।

यजुर्वेदः स्वरूपम् । श्रीमहालक्ष्मीप्रीत्यर्थे

मध्यमचरित्रजपे विनियोगः ।

। ध्यानम् ।

ॐ अक्षस्रक्परशुं(ङ्) गदेषुकुलिशं(म्) पद्मं(न्) धनुष्कुण्डिकां(न्),

दण्डं(म्) शक्तिमसिं(ञ्) च चर्म जलजं(ङ्), घण्टां(म्) सुराभाजनम् ।

शूलं(म्) पाशसुदर्शने च दधतीं(म्), हस्तैः(फ्) प्रसन्नाननां(म्)
सेवे सैरिभमर्दिनीमिह महा-लक्ष्मीं(म्) सरोजस्थिताम् ॥

ॐ ह्रीं ऋषिरुवाच ॥ 1॥

देवासुरमभूद्युद्धं(म्), पूर्णमब्दशतं(म्) पुरा ।
महिषेऽसुराणामधिपे, देवानां(ञ्) च पुरन्दरे ॥ 2॥

तत्रासुरैर्महावीर्यैर्- देवसैन्यं(म्) पराजितम् ।
जित्वा च सकलान् देवा- निन्द्रोऽभून्महिषासुरः ॥ 3॥

ततः(फ्) पराजिता देवाः(फ्), पद्मयोनिं(म्) प्रजापतिम् ।
पुरस्कृत्य गतास्तत्र, यत्रेशगरुडध्वजौ ॥ 4॥

यथावृत्तं(न्) तयोस्तद्वन्-महिषासुरचेष्टितम् ।
त्रिदशाः(ख्) कथयामासुर्-देवाभिभवविस्तरम् ॥ 5॥

सूर्येन्द्राग्न्यनिलेन्दूनां(यँ), यमस्य वरुणस्य च ।
अन्येषां(ञ्) चाधिकारान् स, स्वयमेवाधितिष्ठति ॥ 6॥

स्वर्गान्निराकृताः(स्) सर्वे, तेन देवगणा भुवि ।
विचरन्ति यथा मर्त्या, महिषेण दुरात्मना ॥ 7॥

एतद्वः(ख्) कथितं(म्) सर्व-ममरारिविचेष्टितम् ।
शरणं(वँ) वः(फ्) प्रपन्नाः(स्) स्मो, वधस्तस्य विचिन्त्यताम् ॥ 8॥

इत्थं(न्) निशम्य देवानां(वँ), वचां(म्)सि मधुसूदनः ।
चकार कोपं(म्) शम्भुश्च, भ्रुकुटीकुटिलाननौ ॥ 9॥

ततोऽतिकोपपूर्णस्य, चक्रिणो वदनात्ततः ।
निश्चक्राम महत्तेजो, ब्रह्मणः(श्) शङ्करस्य च ॥ 10॥

अन्येषां(ञ्) चैव देवानां(म्), शक्रादीनां(म्) शरीरतः ।
निर्गतं(म्) सुमहत्तेजस्-तच्चैक्यं(म्) समगच्छत ॥ 11॥

अतीव तेजसः(ख्) कूटं(ञ्), ज्वलन्तमिव पर्वतम् ।
ददृशुस्ते सुरास्तत्र, ज्वालाव्याप्तदिगन्तरम् ॥ 12॥

अतुलं(न्) तत्र तत्तेजः(स्), सर्वदेवशरीरजम् ।
एकस्थं(न्) तदभून्नारी, व्याप्तलोकत्रयं(न्) त्विषा ॥ 13॥

यदभूच्छाम्भवं(न्) तेजस्-तेनाजायत तन्मुखम् ।
याम्येन चाभवन् केशा, बाहवो विष्णुतेजसा ॥ 14॥

सौम्येन स्तनयोर्युग्मं(म्), मध्यं(ञ्) चैन्द्रेण चाभवत् ।
वारुणेन च जङ्घोरू, नितम्बस्तेजसा भुवः ॥ 15॥

ब्रह्मणस्तेजसा पादौ, तदङ्गुल्योऽर्कतेजसा ।
वसूनां(ञ्) च कराङ्गुल्यः(ख), कौबेरेण च नासिका ॥ 16॥

तस्यास्तु दन्ताः(स्) सम्भूताः(फ्), प्राजापत्येन तेजसा ।
नयनत्रितयं(ञ्) जज्ञे, तथा पावकतेजसा ॥ 17॥

भ्रुवौ च सन्ध्ययोस्तेजः(श्), श्रवणावनिलस्य च ।
अन्येषां(ञ्) चैव देवानां(म्), सम्भवस्तेजसां(म्) शिवा ॥ 18॥

ततः(स्) समस्तदेवानां(न्), तेजोराशिसमुद्भवाम् ।
तां(वँ) विलोक्य मुदं(म्) प्रापु-रमरा महिषार्दिताः ॥ 19॥

शूलं(म्) शूलाद्विनिष्कृष्य, ददौ तस्यै पिनाकधृक् ।
चक्रं(ञ्) च दत्तवान् कृष्णः(स्), समुत्पाद्य स्वचक्रतः ॥ 20॥

शङ्खं(ञ्) च वरुणः(श्) शक्तिं(न्), ददौ तस्यै हुताशनः ।
मारुतो दत्तवां(म्)श्चापं(म्), बाणपूर्णे तथेषुधी ॥ 21॥

वज्रमिन्द्रः(स्) समुत्पाद्य, कुलिशादमराधिपः ।
ददौ तस्यै सहस्राक्षो, घण्टामैरावताद् गजात् ॥ 22॥

कालदण्डाद्यमो दण्डं(म्), पाशं(ञ्) चाम्बुपतिर्ददौ ।
प्रजापतिश्चाक्षमालां(न्), ददौ ब्रह्मा कमण्डलुम् ॥ 23॥

समस्तरोमकूपेषु, निजरश्मीन् दिवाकरः ।
कालश्च दत्तवान् खड्गं(न्), तस्याश्चर्म च निर्मलम् ॥ 24॥

क्षीरोदश्चामलं(म्) हार-मजरे च तथाम्बरे ।
चूडामणिं(न्) तथा दिव्यं(ङ्), कुण्डले कटकानि च ॥ 25॥

अर्धचन्द्रं(न्) तथा शुभ्रं(ङ्), केयूरान् सर्वबाहुषु ।
नूपुरौ विमलौ तद्वद्, ग्रैवेयकमनुत्तमम् ॥ 26॥

अङ्गुलीयकरत्नानि, समस्तास्वङ्गुलीषु च ।
विश्वकर्मा ददौ तस्यै, परशुं(ञ्) चातिनिर्मलम् ॥ 27॥

अस्त्राण्यनेकरूपाणि, तथाभेद्यं(ञ्) च दं(म्)शनम् ।
अम्लानपङ्कजां(म्) मालां(म्), शिरस्युरसि चापराम् ॥ 28॥

अददज्जलधिस्तस्यै, पङ्कजं(ञ्) चातिशोभनम् ।
हिमवान् वाहनं(म्) सिंहं(म्), रत्नानि विविधानि च ॥ 29॥

ददावशून्यं(म्) सुरया, पानपात्रं(न्) धनाधिपः ।
शेषश्च सर्वनागेशो, महामणिविभूषितम् ॥ 30॥

नागहारं(न्) ददौ तस्यै, धत्ते यः(फ्) पृथिवीमिमाम् ।
अन्यैरपि सुरैर्देवी, भूषणैरायुधैस्तथा ॥ 31॥

सम्मानिता ननादोच्चैः(स्), साट्टहासं(म्) मुहुर्मुहुः ।
तस्या नादेन घोरेण, कृत्स्नमापूरितं(न्) नभः ॥ 32॥

अमायतातिमहता, प्रतिशब्दो महानभूत् ।
चुक्षुभुः(स्) सकला लोकाः(स्), समुद्राश्च चकम्पिरे ॥ 33॥

चचाल वसुधा चेलुः(स्), सकलाश्च महीधराः ।
जयेति देवाश्च मुदा, तामूचुः(स्) सिं(म्)हवाहिनीम् ॥ 34॥

तुष्टुवुर्मुनयश्चैनां(म्), भक्तिनम्रात्ममूर्तयः ।
दृष्ट्वा समस्तं(म्) सङ्क्षुब्धं(न्), त्रैलोक्यममरारयः ॥ 35॥

सन्नद्धाखिलसैन्यास्ते, समुत्तस्थुरुदायुधाः ।
आः(ख्) किमेतदिति क्रोधा-दाभाष्य महिषासुरः ॥ 36॥

अभ्यधावत तं(म्) शब्द-मशेषैरसुरैर्वृतः ।
स ददर्श ततो देवीं(व्ँ), व्याप्तलोकत्रयां(न्) त्विषा ॥ 37॥

पादाक्रान्त्या नतभुवं(ङ्), किरीटोल्लिखिताम्बराम् ।
क्षोभिताशेषपातालां(न्), धनुर्ज्यानिःस्वनेन ताम् ॥ 38॥

दिशो भुजसहस्रेण, समन्ताद् व्याप्य सं(म्)स्थिताम् ।
ततः(फ्) प्रववृते युद्धं(न्), तया देव्या सुरद्विषाम् ॥ 39॥

शस्त्रास्त्रैर्बहुधा मुक्तै-रादीपितदिगन्तरम् ।
महिषासुरसेनानीश्-चक्षुराख्यो महासुरः ॥ 40॥

युयुधे चामरश्चान्यैश्-चतुरङ्गबलान्वितः ।
रथानामयुतैः(ष्) षड्भि-रुदग्राख्यो महासुरः ॥ 41॥

अयुध्यतायुतानां(ञ्) च, सहस्रेण महाहनुः ।
पञ्चाशद्भिश्च नियुतै-रसिलोमा महासुरः ॥ 42॥

अयुतानां(म्) शतैः(ष्) षड्भिर्-बाष्कलो युयुधे रणे ।
गजवाजिसहस्रौघै- रनेकैः(फ्) परिवारितः ॥ 43॥

वृतो रथानां(ङ्) कोट्या च, युद्धे तस्मिन्नयुध्यत ।
बिडालाख्योऽयुतानां(ञ्) च, पञ्चाशद्भिरथायुतैः ॥ 44॥

युयुधे संयुगे तत्र, रथानां(म्) परिवारितः ।
अन्ये च तत्रायुतशो, रथनागहयैर्वृताः ॥ 45॥

युयुधुः(स्) संयुगे देव्या, सह तत्र महासुराः ।
कोटिकोटिसहस्रैस्तु, रथानां(न्) दन्तिनां(न्) तथा ॥ 46॥

हयानां(ञ्) च वृतो युद्धे, तत्राभून्महिषासुरः ।
तोमरैर्भिन्दिपालैश्च, शक्तिभिर्मुसलैस्तथा ॥ 47॥

युयुधुः(स्) संयुगे देव्या, खड्गैः(फ्) परशुपट्टिशैः ।
केचिच्च चिक्षिपुः(श्) शक्तीः(ख्), केचित्पाशां(म्)स्तथापरे ॥ 48॥

देवीं(ङ्) खड्गप्रहारैस्तु, ते तां(म्) हन्तुं(म्) प्रचक्रमुः ।
सापि देवी ततस्तानि, शस्त्राण्यस्त्राणि चण्डिका ॥ 49॥

लीलयैव प्रचिच्छेद, निजशस्त्रास्त्रवर्षिणी ।
अनायस्तानना देवी, स्तूयमाना सुरर्षिभिः ॥ 50॥

मुमोचासुरदेहेषु, शस्त्राण्यस्त्राणि चेश्वरी ।
सोऽपि क्रुद्धो धुतसटो, देव्या वाहनकेसरी ॥ 51॥

चचारासुरसैन्येषु, वनेष्विव हुताशनः ।
निःश्वासान् मुमुचे यां(म्)श्च, युध्यमाना रणेऽम्बिका ॥ 52॥

त एव सद्यः(स्) सम्भूता, गणाः(श्) शतसहस्रशः ।
युयुधुस्ते परशुभिर्-भिन्दिपालासिपट्टिशैः ॥ 53॥

नाशयन्तोऽसुरगणान्, देवीशक्त्युपबृं(म्)हिताः ।
अवादयन्त पटहान्, गणाः(श्) शङ्खां(म्)स्तथापरे ॥ 54॥

मृदङ्गां(म्)श्च तथैवान्ये, तस्मिन् युद्धमहोत्सवे ।
ततो देवी त्रिशूलेन, गदया शक्तिवृष्टिभिः ॥ 55॥

खड्गादिभिश्च शतशो, निजघान महासुरान् ।
पातयामास चैवान्यान्, घण्टास्वनविमोहितान् ॥ 56॥

असुरान् भुवि पाशेन, बद्ध्वा चान्यानकर्षयत् ।
केचिद् द्विधा कृतास्तीक्ष्णैः(ख्), खड्गपातैस्तथापरे ॥ 57॥

विपोथिता निपातेन, गदया भुवि शेरते ।
वेमुश्च केचिद्रुधिरं(म्), मुसलेन भृशं(म्) हताः ॥ 58॥

केचिन्निपतिता भूमौ, भिन्नाः(श्) शूलेन वक्षसि ।
निरन्तराः(श्) शरौघेण, कृताः(ख्) केचिद्रणाजिरे ॥ 59॥

श्येनानुकारिणः(फ्) प्राणान्, मुमुचुस्त्रिदशार्दनाः ।
केषाञ्चिद् बाहवश्छिन्नाश्-छिन्नग्रीवास्तथापरे ॥ 60॥

शिरां(म्)सि पेतुरन्येषा-मन्ये मध्ये विदारिताः ।
विच्छिन्नजङ्घास्त्वपरे, पेतुरुर्व्यां(म्) महासुराः ॥ 61॥

एकबाह्वक्षिचरणाः(ख्), केचिद्देव्या द्विधा कृताः ।
छिन्नेऽपि चान्ये शिरसि, पतिताः(फ्) पुनरुत्थिताः ॥ 62॥

कबन्धा युयुधुर्देव्या, गृहीतपरमायुधाः ।
ननृतुश्चापरे तत्र, युद्धे तूर्यलयाश्रिताः ॥ 63॥

कबन्धाश्छिन्नशिरसः(ख्), खड्गशक्त्यृष्टिपाणयः ।
तिष्ठ तिष्ठेति भाषन्तो, देवीमन्ये महासुराः ॥ 64॥

पातितै रथनागाश्वै-रसुरैश्च वसुन्धरा ।
अगम्या साभवत्तत्र, यत्राभूत्स महारणः ॥ 65॥

शोणितौघा महानद्यः(स्), सद्यस्तत्र प्रसुस्रुवुः ।
मध्ये चासुरसैन्यस्य, वारणासुरवाजिनाम् ॥ 66॥

क्षणेन तन्महासैन्य-मसुराणां(न्) तथाम्बिका ।
निन्ये क्षयं(यँ) यथा वह्निस्-तृणदारुमहाचयम् ॥ 67॥

स च सिं(म्)हो महानाद-मुत्सृजन्धुतकेसरः ।
शरीरेभ्योऽमरारीणा-मसूनिव विचिन्वति ॥ 68॥

देव्या गणैश्च तैस्तत्र, कृतं(यँ) युद्धं(न्) महासुरैः ।
यथैषां(न्) तुतुषुर्देवाः(फ्), पुष्पवृष्टिमुचो दिवि ॥ 69॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥

उवाच 1, अर्धश्लोकाः 68, श्लोकाः 69, एवमादितः ॥ 173॥